# bhagavadgītā

# chapter 1

धृतराष्ट्र उवाच । धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥१॥
dhṛtarāṣṭra uvāca । dharmakṣetre kurukṣetre samavetā yuyutsavaḥ । māmakāḥ pāṇḍavāścaiva kimakurvata sañjaya ॥ 1

सञ्जय उवाच । दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा । आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥२॥
sañjaya uvāca । dṛṣṭvā tu pāṇḍavānīkaṁ vyūḍhaṁ duryodhanastadā । ācāryamupasaṅgamya rājā vacanamabravīt ॥ 2

# chapter 1

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥३॥
paśyaitāṁ pāṇḍuputrāṇāmācārya mahatīṁ camūm । vyūḍhāṁ drupadaputreṇa tava śiṣyeṇa dhīmatā ॥ 3

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि । युयुधानो विराटश्च द्रुपदश्च महारथः ॥४॥
atra śūrā maheṣvāsā bhīmārjunasamā yudhi । yuyudhāno virāṭaśca drupadaśca mahārathaḥ ॥ 4

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्। पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥५॥
dhṛṣṭaketuścekitānaḥ kāśirājaśca vīryavān । purujitkuntibhojaśca śaibyaśca narapuṅgavaḥ ॥ 5

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् । सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥६॥
yudhāmanyuśca vikrānta uttamaujāśca vīryavān । saubhadro draupadeyāśca sarva eva mahārathāḥ ॥ 6

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम । नायका मम सैन्यस्य सञ्ज्ञार्थं तान्ब्रवीमि ते ॥७॥
asmākaṁ tu viśiṣṭā ye tānnibodha dvijottama । nāyakā mama sainyasya sañjñārthaṁ tānbravīmi te ॥ 7

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः । अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥८॥
bhavānbhīṣmaśca karṇaśca kṛpaśca samitiñjayaḥ । aśvatthāmā vikarṇaśca saumadattistathaiva ca ॥ 8

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः । नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥९॥
anye ca bahavaḥ śūrā madarthe tyaktajīvitāḥ । nānāśastrapraharaṇāḥ sarve yuddhaviśāradāḥ ॥ 9

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥१०॥
aparyāptaṁ tadasmākaṁ balaṁ bhīṣmābhirakṣitam । paryāptaṁ tvidameteṣāṁ balaṁ bhīmābhirakṣitam ॥ 10

अयनेषु च सर्वेषु यथाभागमवस्थिताः । भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥११॥
ayaneṣu ca sarveṣu yathābhāgamavasthitāḥ । bhīṣmamevābhirakṣantu bhavantaḥ sarva eva hi ॥ 11

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः । सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥१२॥
tasya sañjanayanharṣaṁ kuruvṛddhaḥ pitāmahaḥ । siṁhanādaṁ vinadyoccaiḥ śaṅkhaṁ dadhmau pratāpavān ॥ 12

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः । सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१३॥

tataḥ śaṅkhāśca bheryaśca paṇavānakagomukhāḥ । sahasaivābhyahanyanta sa śabdastumulo'bhavat ॥ 13

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ । माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥१४॥

tataḥ śvetairhayairyukte mahati syandane sthitau । mādhavaḥ pāṇḍavaścaiva divyau śaṅkhau pradadhmatuḥ ॥ 14

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः । पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥१५॥
pāñcajanyaṁ hṛṣīkeśo devadattaṁ dhanañjayaḥ । pauṇḍraṁ dadhmau mahāśaṅkhaṁ bhīmakarmā vṛkodaraḥ ॥ 15

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः । नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥१६॥
anantavijayaṁ rājā kuntīputro yudhiṣṭhiraḥ । nakulaḥ sahadevaśca sughoṣamaṇipuṣpakau ॥ 16

काश्यश्च परमेष्वासः शिखण्डी च महारथः । धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१७॥
kāśyaśca parameṣvāsaḥ śikhaṇḍī ca mahārathaḥ । dhṛṣṭadyumno virāṭaśca sātyakiścāparājitaḥ ॥ 17

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते । सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥१८॥
drupado draupadeyāśca sarvaśaḥ pṛthivīpate । saubhadraśca mahābāhuḥ śaṅkhāndadhmuḥ pṛthakpṛthak ॥ 18

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् । नभश्च पृथिवीं चैव तुमुलोव्यनुनादयन् ॥१९॥
sa ghoṣo dhārtarāṣṭrāṇāṁ hṛdayāni vyadārayat । nabhaśca pṛthivīṁ caiva tumulovyanunādayan ॥ 19

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः । प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः । हृषीकेशं तदा वाक्यमिदमाह महीपते ॥२०॥
atha vyavasthitāndṛṣṭvā dhārtarāṣṭrān kapidhvajaḥ । pravṛtte śastrasampāte dhanurudyamya pāṇḍavaḥ । hṛṣīkeśaṁ tadā vākyamidamāha mahīpate ॥ 20

अर्जुन उवाच । सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत । यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ॥२१॥
arjuna uvāca । senayorubhayormadhye rathaṁ sthāpaya me'cyuta । yāvadetānnirīkṣe'haṁ yoddhukāmānavasthitān ॥ 21

कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥२२॥
kairmayā saha yoddhavyamasminraṇasamudyame ॥ 22

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः । धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥२३॥
yotsyamānānavekṣe'haṃ ya ete'tra samāgatāḥ । dhārtarāṣṭrasya durbuddheryuddhe priyacikīrṣavaḥ ॥ 23

सञ्जय उवाच । एवमुक्तो हृषीकेशो गुडाकेशेन भारत । सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥२४॥
sañjaya uvāca । evamukto hṛṣīkeśo guḍākeśena bhārata । senayorubhayormadhye sthāpayitvā rathottamam ॥ 24

# chapter 1

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् । उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥२५॥
bhīṣmadroṇapramukhataḥ sarveṣāṁ ca mahīkṣitām । uvāca pārtha paśyaitānsamavetānkurūniti ॥ 25

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् । आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा । श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥ २६॥
tatrāpaśyatsthitānpārthaḥ pitṝnatha pitāmahān । ācāryānmātulānbhrātṝnputrānpautrānsakhīṁstathā śvaśurānsuhṛdaścaiva senayorubhayorapi ॥ 26

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् । कृपया परयाविष्टो विषीदन्निदमब्रवीत् ॥२७॥
tānsamīkṣya sa kaunteyaḥ sarvānbandhūnavasthitān । kṛpayā parayāviṣṭo viṣīdannidamabravīt ॥ 27

अर्जुन उवाच । दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् । सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥२८॥
arjuna uvāca । dṛṣṭvemaṁ svajanaṁ kṛṣṇa yuyutsuṁ samupasthitam । sīdanti mama gātrāṇi mukhaṁ ca pariśuṣyati ॥ 28

वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥२९॥
vepathuśca śarīre me romaharṣaśca jāyate ॥ 29

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते । न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः । निमित्तानि च पश्यामि विपरीतानि केशव ॥३०॥
gāṇḍīvaṁ sraṁsate hastāttvakcaiva paridahyate । na ca śaknomyavasthātuṁ bhramatīva ca me manaḥ । nimittāni ca paśyāmi viparītāni keśava ॥ 30

न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे । न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥३१॥
na ca śreyo'nupaśyāmi hatvā svajanamāhave । na kāṅkṣe vijayaṁ kṛṣṇa na ca rājyaṁ sukhāni ca ॥ 31

किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा । येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ॥३२॥
kiṁ no rājyena govinda kiṁ bhogairjīvitena vā । yeṣāmarthe kāṅkṣitaṁ no rājyaṁ bhogāḥ sukhāni ca ॥ 32

त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च । आचार्याः पितरः पुत्रास्तथैव च पितामहाः ॥३३॥
ta ime'vasthitā yuddhe prāṇāṁstyaktvā dhanāni ca । ācāryāḥ pitaraḥ putrāstathaiva ca pitāmahāḥ ॥ 33

मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा । एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥३४॥
mātulāḥ śvaśurāḥ pautrāḥ śyālāḥ sambandhinastathā । etānna hantumicchāmi ghnato'pi madhusūdana ॥ 34

अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते । निहत्य धार्तराष्टान्नः का प्रीतिः स्याज्जनार्दन ॥३५॥
api trailokyarājyasya hetoḥ kiṁ nu mahīkṛte । nihatya dhārtarāṣṭānnaḥ kā prītiḥ syājjanārdana ॥ 35

पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः । तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबान्धवान् । स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३६॥
pāpamevāśrayedasmānhatvaitānātatāyinaḥ । tasmānnārhā vayaṁ hantuṁ dhārtarāṣṭrānsvabāndhavān । svajanaṁ hi kathaṁ hatvā sukhinaḥ syāma mādhava ॥ 36

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः । कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥३७॥
yadyapyete na paśyanti lobhopahatacetasaḥ । kulakṣayakṛtaṁ doṣaṁ mitradrohe ca pātakam ॥ 37

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् । कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥३८॥
kathaṁ na jñeyamasmābhiḥ pāpādasmānnivartitum । kulakṣayakṛtaṁ doṣaṁ prapaśyadbhirjanārdana ॥ 38

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः । धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥३९॥
kulakṣaye praṇaśyanti kuladharmāḥ sanātanāḥ । dharme naṣṭe kulaṁ kṛtsnamadharmo'bhibhavatyuta ॥ 39

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः । स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥४०॥
adharmābhibhavātkṛṣṇa praduṣyanti kulastriyaḥ । strīṣu duṣṭāsu vārṣṇeya jāyate varṇasaṅkaraḥ ॥ 40

सङ्करो नरकायैव कुलघ्नानां कुलस्य च । पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥४१॥
saṅkaro narakāyaiva kulaghnānāṁ kulasya ca । patanti pitaro hyeṣāṁ luptapiṇḍodakakriyāḥ ॥ 41

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः । उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥४२॥
doṣairetaiḥ kulaghnānāṁ varṇasaṅkarakārakaiḥ । utsādyante jātidharmāḥ kuladharmāśca śāśvatāḥ ॥ 42

त्सन्नकुलधर्माणां मनुष्याणां जनार्दन । नरके नियतं वासो भवतीत्यनुशुश्रुम ॥४३॥
utsannakuladharmāṇāṁ manuṣyāṇāṁ janārdana । narake niyataṁ vāso bhavatītyanuśuśruma ॥ 43

अहो बत महत्पापं कर्तुं व्यवसिता वयम् । यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥४४॥
aho bata mahatpāpaṁ kartuṁ vyavasitā vayam । yadrājyasukhalobhena hantuṁ svajanamudyatāḥ ॥ 44

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥४५॥
yadi māmapratīkāramaśastraṁ śastrapāṇayaḥ । dhārtarāṣṭrā raṇe hanyustanme kṣemataraṁ bhavet ॥ 45

सञ्जय उवाच । एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४७॥
sañjaya uvāca । evamuktvārjunaḥ saṅkhye rathopastha upāviśat । visṛjya saśaraṁ cāpaṁ śokasaṁvignamānasaḥ ॥ 46

# chapter 1

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोऽध्यायः
om tatsaditi śrīmadbhagavadgītāsūpaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde arjunaviṣādayogo nāma prathamo'dhyāyaḥ